अरुदत्यप्यग्नौ रूढ्या प्रयुक्तः MīmāKau. iii. 32. 12 (*on* i. 2. 10); आदित्यरूपेणाग्नेः स्तुतिरुपपद्यते MīmāKau. iii. 97. 10 (*on* i. 2. 48); iii. 177. 9 (*on* ii. 2. 6); तत्र केवलस्याग्नेर्देवतात्वाभावेन MayūMāli. 26. 35 (*on* i. 3. 3); भगवच्छरीरभूतब्रह्मरुद्राग्नीन्द्रादिचिद्वाचकशब्दानाम् ··· श्रीनारायणे पर्यवसानम् YatīndraDī. 33. 5; स किमग्निरुत जीवः GoviBh. 31. 13 (*on* i. 2. 8); श्रीगुरुः प्रार्थ्यते। तथाग्निभ्यः श्रुतविद्येनोपकोसलेन GoviBh. 249. 2 (*on* iii. 3. 45); ध्यानमग्नेर्द्विधा प्रोक्तम् TantrRā. 29. 69; (राजा)सोऽग्निर्भवति NītiPra. 8. 4; **3 ii** killer of demons etc. ब्रह्मणाग्निः संविदानो रक्षोहा बाधतामितः RV. x. 162. 1; स्तुवानमग्न आ वह यातुधानं किमीदिनम्। त्वं हि देव वन्दितो हन्ता दस्योर्बभूविथ AV. i. 7. 1; अग्निस्तुरीयो यातुहा AV. i. 16. 1; उप प्रागाद्देवो अग्नी रक्षोहामीवचातनः AV. i. 28. 1; यामन्यामनुपयुक्तं वहिष्ठं कर्मन्कर्मन्नाभगमग्निमीडे। रक्षोहणं यज्ञवृधं घृताहुतम् AV. iv. 23. 3; अग्ने त्वचं यातुधानस्य भिन्धि AV. viii. 3. 4; अग्नये रक्षोघ्ने पुरोडाशमष्टाकपालं निर्वपेत् TaiS. II. ii. 2. 2; **3 iii** with *ghṛta* as food etc. घृतमग्नेर्वध्र्यश्वस्य वर्धनम् RV. x. 69. 2; विशां कविं विश्पतिं मानुषीणां शुचिं पावकं घृतपृष्ठमग्निम् RV. v. 4. 3; ऊर्जो नपातं घृतकेशमीमहेऽग्निं यज्ञेषु पूर्व्यम् RV. viii. 60. 2; उदेनमुत्तरं नयाग्ने घृतेनाहुत AV. vi. 5. 1; पर्यस्वानग्न आगमम् AV. ix. 1. 13; अग्निराज्यस्य वेतु VājaS. 6. 16; **3 iv** as *gṛhapati*, *viśpati* मन्द्रो होता गृहपतिरग्ने दूतो विशामसि RV. i. 36. 5; विश्वासां गृहपतिर्विशामसि त्वमग्ने मानुषीणाम् RV. vi. 48. 8; विशामधायि विश्पतिर्दुरोणे ३ग्निर्मन्द्रो मधुवचा ऋतावा RV. vii. 7. 4; विशां राजानमद्भुतमध्यक्षं धर्मणामिमम्। अग्निमीळे स उ श्रवत् RV. viii. 43. 24; देवानां पत्नीरग्निर्गृहपतिर्यज्ञस्य मिथुनम् TaiS. I. vi. 4. 4; अग्नये संवेशपतये स्वाहा VājaS. 2. 20; आवित्तो अग्निर्गृहपतिः VājaS. 10. 9; अग्नये गृहपतये स्वाहा VājaS. 10. 23; अथ सोमं त्वष्टारं देवानां पत्नीरग्निं गृहपतिमिति यजति KauṣīBr. 3. 9 (13. 26); अग्निं गृहपतिमित्याज्येन यजन्ति ĀśvaS'S. I. i. 10. 4; यदि देवसूनां हवींष्यन्वायातयेयुरग्निर्गृहपतिः ĀśvaS'S. I. iv. 11. 5; देवानां पत्नीरग्निं गृहपतिमिति ĀpaS'S. iii. 9. 1; मध्येऽग्निं गृहपतिम् ĀpaS'S. iii. 9. 2; नीच्या अग्नये गृहपतये ĀpaS'S. vii. 27. 10; **3 v** as *damūnas* दमूना गृहपतिर्दम आँ अग्निर्भुवद् रयिपती रयीणाम् RV. i. 60. 4; जुष्टो दमूना अतिथिर्दुरोण इमं नो यज्ञमुप याहि विद्वान्। विश्वा अग्ने अभियुजो विहत्या शत्रूयतामा भरा भोजनानि RV. v. 4. 5; **3 vi** son of strength प्र तव्यसीं नव्यसीं धीतिमग्नये वाचो मतिं सहसः सूनवे भरे RV. i. 143. 1; अग्ने द्युम्नेन जागृवे सहसः सूनवाहुत। एदं बर्हिः सदो मम RV. iii. 24. 3; एना वो अग्निं नमसोर्जो नपातमा हुवे RV. vii. 16. 1; **3 vii** as guest प्रेष्ठं वो अतिथिं गृणीषेऽग्निं शस्तिभिस्तुर्वणिः सजोषाः RV. i. 186. 3; हुवे वः सुद्योत्मानं सुवृक्तिं विशामग्निमतिथिं सुप्रयसम् RV. ii. 4. 1; त्वामग्ने अतिथिं पूर्व्यं विशः शोचिष्केशं गृहपतिं नि षेदिरे RV. v. 8. 2; अग्निमग्निं वः समिधा दुवस्यत प्रियंप्रियं वो अतिथिं गृणीषणि RV. vi. 15. 6; अतिथिः सर्वभूतानामग्निः सोमो गवामृतम् MahāBhā. iii. 1382*(1); **3 viii** with smoke as banner घृतेन त्वावर्धयन्नग्न आहुत धूमस्ते केतुरभवद्दिवि श्रितः RV. v. 11. 3; हरयो धूमकेतवो वातजूता उप द्यवि। यतन्ते वृथगग्नयः RV. viii. 43. 4; **3 ix** bringer of gods to the sacrifice अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत। स देवाँ एह वक्षति RV. i. 1. 2; अग्ने सुखतमे रथे देवाँ ईळित आ वह। असि होता मनुर्हितः RV. i. 13. 4; ऐभिरग्ने सरथं याह्यर्वाङ् नानारथं वा विभवो ह्यश्वाः। पत्नीवतस्त्रिंशतं त्रींश्च देवाननुष्वधमा वह मादयस्व RV. iii. 6. 9; आग्ने वह हविरद्याय देवानिन्द्रज्येष्ठास इह मादयन्ताम् RV. vii. 11. 5; **3 x** as *hotṛ* अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम् RV. i. 1. 1; अच्छा वोचेय शुशुचानमग्निं होतारं विश्वभरसं यजिष्ठम् RV. iv. 1. 19; अबोधि होता यजथाय देवानूर्ध्वो अग्निः सुमनाः प्रातरस्थात् RV. v. 1. 2; प्रत्नं होतारमीड्यं जुष्टमग्निं कविक्रतुम्। अध्वराणामभिश्रियम् RV. viii. 44. 7; तदग्निर्होता वयुनानि विद्वान् विश्वा देवानां जनिमा विवक्ति AV. ii. 28. 2; अग्निर्होता हस्तगृह्या निनाय AV. v. 17. 2; अग्नेर्होत्रेण प्रणुदे सपत्नान् AV. ix. 2. 6; x. 9. 26; अग्निर्होता निषसादा यजीयानुपस्थे मातुः TaiS. I. iii. 14. 1; यदद्य त्वा प्रयति यज्ञे अस्मिन्नग्ने होतारमवृणीमहीह TaiS. I. iv. 44. 2; अग्नि॰होतारमिह त॰हुवे TaiS. I. v. 10 .3; अग्ने देवेद्धमन्विद्ध मन्द्रजिह्वामर्त्यस्य ते होतर्मूर्धन्ना जिघर्मि TaiS. I. vi. 2. 2; अग्ने वेर्होत्रम् VājaS. 2. 9; **3 xi** as messenger त्वामग्ने समिधानं यविष्ठ्य देवा दूतं चक्रिरे हव्यवाहनम् RV. v. 8. 6; अच्छा द्यामरुषो धूम एति सं दूतो अग्न ईयसे हि देवान् RV. vii. 3. 3; अग्निर्ह्येषां दूतः प्रत्येतु विद्वान् AV. iii. 1. 2; अग्निर्दूतो अजिरः सं चराते AV. iii. 4. 3; अग्निश्च हव्यवाहनो भवतां दाशुषे मम AV. vii. 20. 1; अग्नये कव्यवाहनाय स्वधा नमः AV. xviii. 4. 71; अग्नये कव्यवाहनाय स्वाहा VajaS. 2. 29; **3 xii** mentioned with Manu नि त्वामग्ने मनुर्दधे ज्योतिर्जनाय शश्वते RV. i. 36. 19; होतारमग्निं मनुषो नि षेदुर्नमस्यन्त उशिजः शंसमायोः RV. iv. 6. 11; मनुष्वदग्निं मनुना समिद्धं समध्वराय सदमिन्महेम RV. vii. 2. 3; यत्ते मनुर्यदनीकं सुमित्रः समीधे अग्ने तदिदं नवीयः RV. x. 69. 3; **3 xiii** mentioned with *ṛta*, *vrata* घृतप्रतीकं व ऋतस्य धूर्षदमग्निं मित्रं न समिधान ऋञ्जते RV. i. 143. 7; प्र णु त्यं विप्रमध्वरेषु साधुमग्निं होतारमीळते नमोभिः। आ यस्ततान रोदसी ऋतेन नित्यं मृजन्ति वाजिनं घृतेन RV. v. 1. 7; प्र मंहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे। उपस्तुतासो अग्नये RV. viii. 103. 8; त्वमग्ने व्रतपा असि RV. viii. 11. 1; TaiS. I. i. 14. 4; I. ii. 3. 1; अग्ने व्रतपते त्वं व्रतानां व्रतपतिरसि TaiS. I. ii. 11. 1; अग्ने व्रतपते व्रतं चरिष्यामि TaiS. I. v. 10. 3; अग्निर्वै देवानां व्रतपतिः TaiS. I. vi. 7. 2; अग्ने व्रतपाः VājaS. 5. 6; 5. 40; अग्निर्वै देवानां व्रतपतिः S'atBr. I. i. 1. 2; अग्ने व्रतपते व्रतमचारिषम् S'atBr. I. i. 1. 3; ChāndoUBr. i. 6. 9; ĀśvaS'S. I. iii. 12. 13; अग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपेत् ĀpaS'S. ix. 3. 16; ix. 4. 15; स प्रजापतिः संवत्सरोऽग्निर्ऋतमुच्यते CaturCin. iii( 1 ). 39. 16; **3 xiv** who taught the Sāmaveda to Kaśyapa कश्यपोऽग्नेः VaṁśBr. 2. 28; **3 xv** presiding over a particular kind of Sāmaveda Saṁhitā उत्सेधपरोक्षवृद्धाग्नेः SaṁhiUBr. i. 21; **3 xvi** presiding over a specific Sāman अग्निरिन्द्रः प्रजापतिः सोमो वरुणस्त्वष्टाङ्गिरसः पूषा सरस्वतीन्द्राग्नी DevaBr. 1. 1; **3 xvii** as *jātavedas* यज्ञेन वर्धत जातवेदसमग्निं यजध्वं हविषा तना गिरा RV. ii. 2. 1; यस्मै त्वं सुकृते जातवेद उ लोकमग्ने कृणवः स्योनम् RV. v. 4. 11; अग्निर्होता गृहपतिः स राजा विश्वा वेद जनिमा जातवेदाः RV. vi. 15. 13; यत्रैषामग्ने जनिमानि वेत्थ गुहा सतामत्रिणां जातवेदः AV. i. 8. 4; सुजातं जातवेदसमग्निं वैश्वानरं विभुम्। हव्यवाहं हवामहे AV. iv. 23. 4; तथा तदग्ने कृणु जातवेदो विश्वेभिर्देवैः सह संविदानः AV. v. 29. 2; यत्रेदानीं पश्यसि जातवेदस्तिष्ठन्तमग्ने AV. viii. 3. 5; तमिन्द्राय पथिभिर्देवयानैर्हुतमग्निर्वहतु जातवेदाः AV. ix. 4. 3; अग्निः सुभगां जातवेदाः पत्ये पत्नीं जरदष्टिं कृणोतु AV. xiv. 1. 49; अग्नये जातवेदसे पुरोडाशमष्टाकपालं निर्वपेद् भूतिकामः TaiS. II. ii. 3. 3; BaudhS'S. ii. 122. 15; **3 xviii** as *vaiśvānara* वैश्वानरो नृतमो यह्वो अग्निः RV. iv. 5. 2; वैश्वानरो वावृधे जागृवद्भिः RV. vii. 5. 1; अग्ने वैश्वानर विश्वैर्मा देवैः पाहि स्वाहा AV. ii. 16. 4; अग्निः प्रातःसवने पात्वस्मान्वैश्वानरो विश्वकृद्विश्वशंभूः AV. vi. 47. 1; xii. 1. 6; अग्निं वैश्वानरं गच्छ स्वाहा TaiS. I. iii. 11. 1; उपयामगृहीतोऽस्यग्नये त्वा वैश्वानराय TaiS. I. iv. 13. 1; वैश्वानरो न ऊत्या प्रयातु परावतः। अग्निरुक्थेन वाहसा TaiS. I. v. 11. 1; वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषः पातु नक्तम् TaiS. 1. v. 11. 1; जातो यदग्ने भुवना व्यख्यः पशुं न गोपा इर्यः परिज्मा। वैश्वानर ब्रह्मणे विन्द गातुम् TaiS. I. v. 11. 2; वयं जयेम शतिन॰सहस्रिणं वैश्वानर वाजमग्ने तवोतिभिः TaiS. I. v. 11. 2; अग्निं वैश्वानरं गच्छ VājaS. 6. 21; अग्नये वैश्वानराय स्वाहा VājaS. 11. 66; अभूदिदं विश्वस्य भुवनस्य वाजिनमग्नेर्वैश्वानरस्य च VājaS. 13. 39; अग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामिह VājaS. 14. 7; अग्नेश्च वैश्वानरस्यार्षेयम् ĀrṣeBr. i. 2. 9; अग्नेर्वैश्वानरस्य यज्ञायज्ञीयम् ĀrṣeBr. i. 5. 1; अग्नेर्वैश्वानरस्य सामनी द्वे ĀrṣeBr. i. 8. 4; अग्नेर्वैश्वानरस्य राक्षोघ्नमत्रेर्वा ĀrṣeBr. i. 9. 8; अग्नेर्वैश्वानरस्य सामानि ĀrṣeBr. v. 7. 7; अग्नेर्वैश्वानरस्य त्रीणि ĀrṣeBr. vi(1). 4. 1; अग्नये वैश्वानराय द्वादशकपालं पुरोडाशम्···निर्वपति S'atBr. XI. i. 5. 5; अग्नये वैश्वानराय पुरोडाशं निर्वपति ĀpaS'S. xvi. 8. 7; **3 xix** as *sviṣṭakṛt* अग्निं प्रति स्विष्टकृतं निराह TaiS. I. v. 2. 3; अग्नेः स्विष्टकृतोऽहं देवयज्ययायुष्मान् यज्ञेन प्रतिष्ठां गमेयम् TaiS. I. vi. 2. 4; I. vi. 4. 1; अग्नेः स्विष्टकृतोऽहमुज्जितिमनूज्जेषम् TaiS. I. iv. 4. 2; यदग्नये स्विष्टकृतेऽवद्यति TaiS II. vi. 6. 5; स यदनुवषट्करोत्यग्नेरेव स्विष्टकृतोऽनन्तरित्यै AitBr. 4. 5 (95); ĀśvaS'S. I. ii. 19. 25; दक्षिणस्य पुरोडाशस्योत्तरार्धादवद्यन्नाहाग्नये स्विष्टकृतेऽनुब्रूहीति BaudhS'S. i. 25. 19; सकृत्सकृदवदायाग्निं स्विष्टकृतम् ĀpaS'S. iii. 11. 5; अग्निस्स्विष्टकृद्द्वितीयः BaudhGS. i. 4. 41; अग्नये स्वाहा सोमाय स्वाहाग्नीषोमाभ्याम्···अग्नये स्विष्टकृत इति GautDS. iii. 8. 16; **3 xx** called Aṅgiras त्वमग्ने प्रथमो अङ्गिराः RV. i. 31. 1; अग्ने अङ्गिरः RV. v. 10. 7; तुभ्यं ता अङ्गिरस्तम विश्वाः सुक्षितयः पृथक्। अग्ने कामाय येमिरे RV. viii. 43. 18; TaiS. I. iii. 14. 3; अग्ने अङ्गिर आयुना नाम्नेहि VājaS. 5. 9; **3 xxi** called Bhārata श्रेष्ठं यविष्ठ भारताग्ने द्युमन्तमा भर। वसो पुरुस्पृहं रयिम् RV. ii. 7. 1; तस्मा अग्निर्भारतः शर्म यंसज्ज्योक् पश्यात्सूर्यमुच्चरन्तम् RV. iv. 25. 4; **3 xxii** a large number of epithets are used with Agni in the ritual literature, some of which are अंहोमुच्, अग्निमत्, अग्निवत्, अनीकवत्, अन्नपति, अन्नवत्, अन्नाद . अप्सुमत्, आङ्गिरस, आमाद, आयुष्मत्, इन्दुमत्, कव्यवाहन, काम, क्रव्याद्, क्षत्रभृत्, क्षत्रवत्, क्षमवत्, क्षामवत्, गायत्र, जनद्वत्, ज्योतिष्मत्, तन्तुमत्, तपस्वत्, तेजस्वत्, तेजस्विन्, त्रिवृत्, दातृ, धामच्छद्, नराशंस,